ऐन्द्रियकं, त्रि, (इन्द्रियेणानुभूयते। इन्द्रिय + वुञ्।) प्रत्यक्षम्। इन्द्रियग्राह्यम्। इत्यमरः॥ (व्याधिविशेषः। यथा,—

"मिथ्याभियोगहीनेभ्यो यो व्याधिरुपजायते।
शब्दादीनां स विज्ञेयो व्याधिरैन्द्रियको बुधैः॥
वेदनानामशान्तानामित्येते हेतवः स्मृताः।
सुखहेतुर्मतस्त्वेकः समयोगः सुदुर्लभः॥
नेन्द्रियाणि न चैवार्थाः सुखदुःखस्य हेतवः।
हेतुस्तु सुखदुःखस्य योगो दृष्टश्चतुर्विधः॥
सन्तीन्द्रियाणि सन्त्यर्था योगो न च न चास्ति रुक्।
न सुखं कारणं तस्मात् योगएव चतुर्व्विधः॥
नात्मेन्द्रियमनोबुद्धिगोचरं कर्म्म वा विना।
सुखं दुःखं यथा यच्च बोद्धव्यं तत्तथोच्यते॥
स्पर्शनेन्द्रियसंस्पर्शः स्पर्शो मानस एव च।
द्विविधः सुखदुःखानां वेदनानां प्रवर्त्तकः।
इच्छा द्वेषात्मिका तृष्णा सुखदुःखात् प्रवर्त्तते॥
तृष्णा च सुखदुःखानां कारणं पुनरुच्यते।
उपादत्ते हि सा भावान् वेदनाश्रयसंज्ञकान्॥
स्पृश्यते नानुपादाने न स्पृष्टो वेत्ति वेदनाः।
वेदनानामधिष्ठानं मनो देहश्च सेन्द्रियः॥
केशलोमनखाग्रान्नमलद्रवगुणैर्विना"।
इति चरके शारीरे १ अः॥)

ऐन्द्री, स्त्री, (इन्द्रस्य शक्रस्य इयम्। इन्द्र + "तस्येदम्"। ४। ३। १२०। इत्यण्। टिड्ढेति। ४। १। १५। ङीप्।) शची। (यथा, मार्कण्डेये ८८। २०। "वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता"। इन्द्रस्य योगैश्वर्य्यशालिनो महादेवस्य पत्नी।) दुर्गा। इति शब्दरत्नावली॥ अलक्ष्मीः। इति त्रिकाण्डशेषः॥ इन्द्रवारुणी। इति रत्नमाला॥ राखाल शसा इति भाषा। पूर्व्वा दिक्। इत्यमरटीकायां रमानाथः॥ एला। इति राजनिर्घण्टः॥ एलाचि इति भाषा।

"यच्चाक्रमैन्द्री नलिनानि दूर्व्वा"।
इति सूत्रे ३ अध्याये। चरकेणोक्तम्॥)

ऐभी, स्त्री, (इभ इत्याख्यास्त्यस्याः। इभ + "प्रज्ञादिभ्यश्च"। ५। ४। ३८। इति अण् + ङीप्।) हस्तिघोषा लता। इति राजनिर्घण्टः॥

ऐरावणः, पुं, (इरया जलेन वणति शब्दायते इति। इरा + वण + पचाद्यच्। तत इरावणएव स्वार्थे प्रज्ञाद्यण् ५। ४। ३८। यद्वा इरा सुरा वनमुदकं यस्मिन्। पूर्व्वपदादिति ८। ४। ३। णत्वम्। तत्र भवः। इरावण + अण्।) ऐरावतहस्ती इत्यमरः॥ यथा, महाभारते १। १८। ४१।

"श्वेतैर्दन्तैश्चतुर्भिस्तु महाकायस्ततःपरम्।
ऐरावणो महानागोऽभवद्वज्रभृता धृतः"॥)

ऐरावतं, क्ली, (इरा जलानि सन्त्यस्मिन्। इरा + मतुप्। इरावान् मेघः। तत्र भवः। इत्यण्। जलवति मेघे सूर्य्यकरपतनादस्योत्पत्तेस्तथात्वम्॥) इन्द्रस्य ऋजुदीर्घधनुः।

इति मेदिनी॥ रामधनुक् इति भाषा॥

ऐरावतः, पुं, (इरा जलानि विद्यतेऽस्मिन्। मतुप्। इरावान् समुद्रः। तत्र भवः इति। इरावत् + अण्। समुद्रमथनोत्थितत्वादस्य तथात्वम्। यद्वा इरावत्या विद्युत अयं तस्येदमित्यण् ४। ३। १२०।) इन्द्रहस्ती। स तु शुक्लवर्णः चतुर्द्दन्तः समुद्रमथनोत्थितः पूर्व्वदिग्गजश्च। तत्पर्य्यायः। अभ्रमातङ्गः २ ऐरावणः ३ अभ्रमुवल्लभः ४। इत्यमरः॥ श्वेतहस्ती ५ चतुर्द्दन्तः ६ मल्लनागः ७ इन्द्रकुञ्जरः ८ हस्तिमल्लः ९ सदादानः १०। इति जटाधरः॥ सुदामा ११ श्वेतकुञ्जरः १२ गजाग्रणीः १३ नागमल्लः १४। इति शब्दरत्नावली॥ (यथा, कुमारे। ३। २२॥ ("ऐरावतास्फालनकर्कशेन"। "प्रावृषेण्यं पयोवाहं विद्युदैरावताविव"।

इति रघौ। १। ३६॥)

नागरङ्गः। लकुचवृक्षः। नागभेदः। इति मेदिनी॥ ("ऐरावतं दन्तशठमम्लं शोणितपित्तकृत्"। इति सूत्रे। ४६ अः। सुश्रुतेनोक्तम्॥) (इरावत्या नद्याः सन्निकृष्टो देशः। इरावती + अण्। यथा, महाभारते ३। १६२। ३३।

"बभूव परमास्थानामैरावतपथे यथा"॥)

ऐरावती, स्त्री, (इरा जलानि विद्यन्तेऽस्य इरावान् मेघस्तस्य इयं। इरावत् + "तस्येदम्"। ४। ३। १२०। इति अण् + ङीप्।) विद्युत्। विद्युद्विशेषः इति मेदिनी॥ ऐरावतभार्य्या। इत्यमरटीकायां स्वामी॥ वटपत्रीवृक्षः। इति राजनिर्घण्टः॥ पञ्चालदेशीयनदीविशेषः। अधुना रावी इति ख्याता॥ (उत्तरमार्गे नक्षत्रविशेषाणां संज्ञाभेदः यथा।

"पुष्याश्लेषा तथादित्या वीथी चैरावती स्मृता"॥)

ऐरिणं, क्ली, (इरिणे उषरभूमौ भवम्। इरिण + अण्।) पांशवलवणम्। इति राजनिर्घण्टः॥ (पांशुलवणेऽस्य विवरणं ज्ञेयम्॥)

ऐरेयं, क्ली, (इरा + ढक्।) मद्यम्। इरा एव ऐरेयं स्वार्थे ष्णेयप्रत्यये वृद्धिः॥ (यत्रास्य व्यवहारस्तद्यथा,—

"ऋतेऽप्यूर्द्धमधश्चैवमैरेयास्वसुरासवैः"।
इति वैद्यकचक्रपाणिसंग्रहे विद्रध्यधिकारे॥)

ऐलः, पुं, (इलाया अपत्यं पुमान्। इला + अण्।) इलापुत्त्रः। स तु चन्द्रवंशीयो राजा पुरूरवाः। इति हेमचन्द्रः॥ (यथा महाभारते। १। ७५। १७।

"पुरूरवास्ततो विद्वानिलायां समपद्यत।
सा वै तस्याभवन्माता पिता चैवेति नः श्रुतम्"॥
"षट् सुता जज्ञिरेऽथैलादायुर्द्धीमानमावसुः"। २४॥)

ऐलवालुकं, क्ली, (एलवालुकमेव। स्वार्थे अण्।) एलवालुकम्। इति शब्दरत्नावली॥

ऐलविलः, पुं, (इलविलाया अपत्यं पुमान्। इलविल + अण्।) इलविलापुत्त्रः। स तु कुवेरः। इत्यमरः॥ तस्य रूपान्तराणि। ऐड़विड़ः। ऐड़विलः। एलविलः॥

ऐलेयं, क्ली, एलवालुकनामगन्धद्रव्यम्। इत्यमरः॥ (एलवालुकशब्देऽस्य विशेषो ज्ञातव्यः॥) (पुं, इलाया अपत्यम्। इला + ढक्। मङ्गलः। भौमः। पुरूरवाः॥)

ऐशानी, स्त्री, (ईशानस्य महादेवस्य इयम्। ईशान + "तस्येदम्"। ४। ३। १२०। इति अण् + ङीप्।) ईशानकोणः। इति जटाधरः॥ ("ऐशानीक्रमतो रेखा" इति स्मृतिः। "ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने"। इति तिथितत्त्वम्॥)

ऐशिकः, त्रि, (ईशस्य अयम्। ईश + ईकक्।) ईश्वरसम्बन्धी। ईश्वरेर इति भाषा॥

ऐशी } ऐश्वरी } त्रि, (ईशस्य ईश्वरस्य च इयम्। ईश + ईश्वर + अण् + ङीप्।) ईश्वरसम्बन्धी। ईश्वरेर इति भाषा॥

ऐश्वर्य्यं, क्ली, (ईश्वरस्य भावः। ईश्वर + ष्यञ्।) ईश्वरधर्म्मः। तत्पर्य्यायः। विभूतिः २ भूतिः ३। स चाष्टविधो यथा। अणिमा १ लघिमा २ प्राप्तिः ३ प्राकाम्यम् ४ महिमा ५ ईशित्वम् ६ वशित्वम् ७ कामावशायिता ८। इत्यमरः॥ ("ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना"॥ इति पुराणम्। "ऐश्वर्य्यम प बुद्धिधर्म्मः यतोऽणिमादिप्रादुर्भावः"। इति वाचस्पतिमिश्रः। सम्पत्तिः। प्रभुत्वम्। नियन्तृत्वम्। यथा रघुवंशे। १२। ६९॥

"तस्मै निशाचरैश्वर्य्यं प्रतिशुश्राव राघवः"॥)
इति॥)

ऐश्वर्य्यकर्म्मा, [न्] पुं, (ऐश्वर्य्यं कर्म्म यस्य।) ईश्वरसम्बन्धिकर्म्मयुक्तः। तत्पर्य्यायः। इरज्यति १ पत्यते २ क्षयति ३ राजति ४। इति चत्वार ऐश्वर्य्यकर्म्माणः। इति वेदनिर्घण्टौ २ अध्यायः॥

ऐषमः, [स्] अ, (अस्मिन् वत्सरे इति। "सद्यःपरुत्परार्य्यैषमः" ५। ३। २२। इति इदम इश् समसनुप्रत्ययश्च संवत्सरे निपात्यते।) वर्त्तमानवत्सरः। इत्यमरः॥

ऐषमस्तनः, त्रि, (ऐषमोभवः। "ऐषमोह्यःश्वसोऽन्यतरस्याम्"। ४। २। १०५। इति शैषिकेष्वर्थेषु पक्षे त्युप् तुट् च।) ऐषमःसम्बन्धी। एइ वत्सरेर इति भाषा। इति पाणिनिः॥ ७। २। १०५॥

ऐषमस्त्यः, त्रि, (ऐषमोभवः। ऐषमस् + ऐषमोह्यसिति पक्षे त्यप्) ऐषमस्तनः इति पाणिनिः॥

ऐहिकं, त्रि, (इह + ठञ्।) इह भवम्। इहकालेर इति भाषा। इति व्याकरणम्॥ (यथा भागवते ५। १४। ३२। "क्वचिद्द्रुमवदैहिकार्थेषु रंस्यन् यथा वानरः सुतदारवत्सलो व्यवायक्षणः"॥)

ओ

ओ ओकारः। स तु त्रयोदशस्वरवर्णः। अस्योच्चारणस्थानं ओष्ठः कण्ठश्च। ("ओदौतोः कण्ठौष्ठम्" इत्युक्तेः। तथा च शिक्षायामुक्तम्।

"ए ऐ तु कण्ठतालव्यावोऔ कण्ठौष्ठजौ स्मृतौ"॥)

स तु ह्रस्वो न भवति। दीर्घः प्लुतश्च भवति। (प्रत्येकं उदात्तानुदात्तस्वरितभेदैस्त्रिविधोऽपि अनुनासिकाननुनासिकभेदाभ्यां षड्विधः। एतेन द्वादशविध एव निर्णीतः।)